गतानां द्वात्रिंशत् सङ्ख्याकानां उपनिषदां सह-नाव वत्विति शान्तिरिति” ॥)

क्षुरिकापत्रः, पुं, (क्षुरिका इव क्षुरवदित्यर्थः पत्र-मस्य ।) शरः । इति राजनिर्घण्टः ॥

क्षुरिणी, स्त्री, (क्षुरः अस्या अस्तीति । इनिः ङीप् च ।) वराहक्रान्ता । इति शब्दचन्द्रिका ॥ नापित-भार्य्या च ॥

क्षुरी, [न्] पुं, (क्षुरोऽस्यास्तीति । क्षुर + इनिः ।) नापितः । इत्यमरः । २ । १० । १० ॥

क्षुरी, स्त्री, (क्षुदः क्षुरः क्षुर इव वा । क्षुर + स्वल्पार्थे ङीप् ।) छुरिका । इति हेमचन्द्रः ॥ क्षुरीति च पाठः ॥

क्षुल्लः, त्रि, (क्षुद सम्पेषणे + सम्पदादित्वात् क्विप् । क्षुदं लाति गृह्णातीति । क्षुद + ला + कः ।) लघुः । इति हेमचन्द्रः ॥ (यथा, भागवते । ३ । ५ । १० ।

“श्रद्धस्तः क्षुल्लसुखावहानां
तेषामृते कृष्णकथामृतौघात्” ॥)

क्षुल्लकः, त्रि, (क्षुल्ल + स्वार्थे कन् ।) क्षुद्रः । इत्यमरः । ३ । ३ । १० ॥ स्वल्पः । नीचकः । कनिष्ठः । दरिद्रः । इति भरतः ॥ पामरः । दुःखितः । (यथा, भागवते । ४ । १० । २९ ।

“येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् ।
अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः” ॥)

खलः । इति हेमचन्द्रः ॥ शब्दरत्नावल्यां खुल्लक इति च पाठः ॥

क्षुल्लकः, पुं, (क्षुल्ल + संज्ञायां स्वल्पार्थे वा कन् ।) क्षुद्र-शङ्खः । इति हेमचन्द्रः राजनिर्घण्टश्च ॥ (शोधना-दिप्रकरणेऽस्य विषयो यथा,—

“कङ्कुष्ठं गैरिकं शङ्खं कासीसं टङ्कणन्तथा ।
नीलाञ्जनं शुक्तिभेदाः क्षुल्लकाः सवराटकाः ॥
जम्बीरवारिणा स्विन्नाः क्षालिताः कोष्णवारिणा
शुद्धिमायान्त्यमी योज्या भिषग्भिर्योगसिद्धये” ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)

क्षुल्लतातः, पुं, (क्षुल्लः पितुः कनिष्ठः स चासौ तातश्चेति नित्यकर्म्मधारयः ।) पितृकनिष्ठभ्राता । इति क्षुल्लतातकशब्ददर्शनात् ॥ शब्दरत्नावल्यां खुल्लतात इति पाठः ॥

क्षुल्लतातकः, पुं, (क्षुल्लतात + स्वार्थे कन् ।) पितृव्यः । इति जटाधरः । खुड़ा इति भाषा ॥

क्षेत्रं, क्ली, (क्षि + ष्ट्रन् ।) भूमिः । क्षेत इति भाषा ॥ तत्पर्य्यायः । वप्रम् । २ केदारः ३ । इत्यमरः । २ । ९ । ११ ॥ वलजम् ४ निष्कुटः ५, राजिका ६ पाटीरः ७ । इति जटाधरः ॥ * ॥ तत्समूहवाच-कानि यथा,—

“कैदारकन्तु कैदार्य्यं क्षेत्रं कैदारकं तथा ।
वारटञ्चेति पर्य्यायः क्षेत्रवृन्दे निगद्यते” ॥

इति शब्दरत्नावली ॥ * ॥ तद्भेदा यथा,—

“व्रीहिभवोचितं क्षेत्रं व्रैहेयं तत् समीरितम् ।
शाल्युद्भवोचितं यत्तु शालेयमभिधीयते ॥
यव्यं यवोचितं क्षेत्रं यवक्यं यवकोचितम् ।
षष्टिकोद्भवनं यत्तु षष्टिक्य तत् प्रकीर्त्तितम् ॥
विलाद्भवोचितं यत्तु तिल्यं तैलीनमित्यपि ।
एवं माषन्तु माषीणं कौद्रव्यं कौद्रवीणवत् ॥
तथा भङ्गाञ्च भाङ्गीनमुम्यमौमीनमित्यपि ।
अथ मौद्गाञ्च मौद्गीनमणव्यमाणवीनवत् ॥
माषकोद्रवभङ्गोमामुद्गाणुप्रभवोचितम् ।
बीजाकृतमुप्तकृष्टमुत बीतिसमाह्वये ॥
सीत्यं कृष्टञ्च हल्यञ्च हलीयाकृतमित्यपि ।
त्रिगुणाकृतमित्येवं त्रिवारकृष्टभूमिषु ॥
शम्बाकृतं द्विहल्यञ्च द्विसीत्यं द्विगुणाकृतम् ।
द्वितीयाकृतमप्यत्र द्विवारकृष्टभूमिषु ॥
द्रोणाढ़कखार्य्यादिर्व्वापादौ द्रौणिकस्तथा ।
स्यादाढ़किकखारीकौ उत्तमर्णादयस्त्रिषु ।
आदिर्भ्यां प्रास्थिकादिश्च पाकादौ द्रौणिकोऽपि च” ॥

इति च शब्दरत्नावली ।

परक्षेत्रे गोचारणकथननिषेधो यथा,—

“न कुर्य्यात् सख्यवैराणि विवादं न च पैशुनम् ।
परक्षेत्रे गां चरन्तीं न चाचक्षीत कस्यचित्” ॥

इति कूर्म्मपुराणे उपविभागे १५ अध्यायः ॥ * ॥ अपि च । मनुः ।

“आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले ।
भक्षयन्तीं न कथयेत् पिबन्तञ्चैव वत्सकम्” ॥

इति प्रायश्चित्ततत्त्वम् ॥ * ॥ तत्रस्थजलगुणाः ।

“कैदारं मधुरं प्रोक्तं विपाके गुरु दोषलम्” ॥

इति राजवल्लभः ॥ * ॥

अथ सिद्धक्षेत्राणि ।

तत्र वाराणसीक्षेत्रं यथा,—

“आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत् ।
कथितं नातिदूरे च वर्त्तते नरसत्तमौ” ॥ * ॥

कामरूपक्षेत्रं यथा,—

“नाचिरात् कामदं पुण्यं क्षेत्रं पीठं निगद्यते ।
चिरात्तु कामदो देवो न चिराद्यत्र ज्ञानदः ॥
तत् क्षेत्रमिति लोके यद्गद्यते पूर्ब्बसूरिभिः ।
कामरूपं महापीठं गुह्याद्गुह्यतमं परम्” ॥

इति च कालिकापुराणे ५० अध्यायः ॥ * ॥

गङ्गाक्षेत्रं यथा, स्कान्दे ।

“तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते” ॥

नारायणक्षेत्रं यथा,—

“प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
तत्र नारायणः स्वामी गङ्गागर्भान्तरे वरे ॥
तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च” ॥

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥ * ॥

भास्करक्षेत्रं यथा, स्मृतिसमुच्चयलिखितवचने ।

“गङ्गायां भास्करक्षेत्रे मातापित्रोर्म्मृते गुरौ ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम्” ॥

भास्करक्षेत्रं प्रयागः । इति प्रायश्चित्ततत्त्वम् ॥ * ॥

गयाक्षेत्रं यथा,—

“पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः” ॥

इति वायुपुराणम् ॥ * ॥ पुरुषोत्तमक्षेत्रं यथा,—

मुनय ऊचुः ।

“पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनम्” ॥

इत्यादि ।

जैमिनिरुवाच ।

“एतत् क्षेत्रवरस्यास्य वपुर्भूतं महात्मनः ।
स्वयं वपुष्मान् यत्रास्ते स्वनाम्ना ख्यापितं हि तत्” ॥

इत्युत्कलखण्डम् ॥ * ॥ विष्णुक्षेत्राणि यथा,—

श्रीभगवानुवाच ।

“इत्थंगुण्यावस्थितो ब्रह्मन् ! गुह्यनामानि मेऽधुना ।
क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि यत्नतः ॥
कोकामुखे वराहञ्च मन्दरे मधुसूदनम् ।
अनन्तं कपिलद्वीपे प्रभासे रविनन्दनम् ॥
माल्योदये तु वैकुण्ठं महेन्द्रे तु नृपात्मकम् ।
ऋषभे तु महाविष्णुं द्वारकायान्तु भूपतिम् ॥
पाण्डुसह्ये तु देवेशं वसुकुण्डे जगत्पतिम् ।
वन्दीवने महायोगं चित्रकूटे नराधिपम् ॥
नैमिषे पीतवासञ्च गवां निष्क्रमणे हरिम् ।
शालग्रामे तपोवासमचिन्त्यं गन्धमादने ॥
कुब्जाम्रके हृषीकेशं गङ्गाद्वारे गदाधरम् ।
गरुड़ध्वजं तोषके च गोविन्दं नागसाह्वये ॥
वृन्दावने तु गोपालं मथुरायां स्वयम्भुवम् ।
केदारे माधवं विद्यात् वाराणस्यान्तु केशवम् ॥
पुष्करे पुष्कराक्षन्तु दृषद्वत्यां जयध्वजम् ।
तृणबिन्दुवने वीरमशोकं सिन्धुसागरे ॥
कसे वटे महाबाहुममृतं तेजसो वने ।
विशाखयूपे विश्वेशं नारसिंहं वने वने ॥
लोहाकुले रिपुहरं देवशाले त्रिविक्रमम् ।
पुरुषोत्तमं दशपुरे कुब्जके वामनं विदुः ॥
विद्याधरं वितस्तायां वाराहे धरणीधरम् ।
देवदारुवने गुह्यं कावेर्य्यां नागशायिनम् ॥
प्रयागे योगमूर्त्तिञ्च पयोष्ण्यां सुन्दरं विदुः ।
कुमारतीर्थे कौमारं लौहित्ये हयशीरषम् ॥
उज्जयन्यां त्रिविक्रमं लिङ्गस्फोटे चतुर्भुजम् ।
हरिहरं तुङ्गभद्रायां दृष्ट्वा पापात् प्रमुच्यते ॥
विश्वरूपं कुरुक्षेत्रे मणिकुण्डे हलायुधम् ।
लोकनाथमयोध्यायां कुण्डिने रुक्मिणीपतिम् ॥
भद्गौरे वासुदेवञ्च चक्रतीर्थे सुदर्शनम् ।
आद्यं विष्णुपदे विद्यात् शूकरे शूकरं विदुः ॥
कुशेशं मानसे तीर्थे दण्डके श्यामलं विदुः ।
त्रिकूटे नागमोक्षञ्च मेरुपृष्ठे च भास्करम् ॥
विरजं पुष्पभद्रायां बालस्वामीकरे विदुः ।
यशस्करं विपाशायां माहिष्मत्यां हुताशनम् ॥
क्षीराब्धौ पद्मनाभञ्च विमले तु सनातनम् ।
शिवनद्यां शिवकरं गयायाञ्च गदाधरम् ॥
सर्व्वत्र परमात्मानं यः पश्यति स मुच्यते ॥
अष्टषष्टिस्तु नामानि कीर्त्तितानि मया तव ।
क्षेत्राणि चैव गुह्यानि कथितानि विशेषतः ॥
दृष्टव्यानि यथाशक्त्या क्षेत्राण्येतानि मानवैः ।
वैष्णवैस्तु विशेषेण तेषां मुक्तिं ददाम्यहम्” ॥

इति नारसिंहे ६२ अध्यायः ॥ * ॥ मेषादि-द्वादशराशिः । यथा,—

“राशिनामानि च क्षेत्रं भमृक्षं गृहनाम च ।
मेषादीनाञ्च पर्य्यायं लोकादेव विचिन्तयेत्” ॥ * ॥

ग्रहाणां क्षेत्राणि यथा,—

“कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम् ।